

# संस्कृत-वर्णमाला

संस्कृतवर्णाः मुख्यतया त्रिषु भागेषु (स्वराः,व्यञ्जनानि, अयोगवाहाः च) विभक्ताः सन्ति, येषु अनुस्वार-विसर्ग-सहिताः १३ स्वराः, ३३ व्यञ्जनानि, आहत्य ४६ मानकाक्षराणि च सन्ति। [१, २, ३]।

एतेषां सर्वेषाम् अक्षराणां सम्यक् क्रमिकवर्णनम् अधः पृथक्-पृथक् प्रदत्तम् अस्ति।

## १. स्वराः (अच्)

संस्कृते स्वराः 'अच्-वर्णाः' इति उच्यन्ते। पारम्परिकवर्णमालानुसारम् एते १३ सन्ति, ये उच्चारणसमयानुसारं विभक्ताः सन्ति—

- **ह्रस्वस्वराः** (५): अ, इ, उ, ऋ, लृ
- **दीर्घस्वराः** (८): आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ

## २. अयोगवाहाः (अनुस्वारः विसर्गश्च)

अनुस्वारस्य विसर्गस्य च स्वतन्त्रम् अस्तित्वं नास्ति। एतौ सर्वदा स्वराणां पश्चात् भवतः, अतः एतौ 'स्वराश्रितौ' अपि उच्येते। वर्णक्रमेण तौ स्वराणां तत्क्षण-पश्चात् व्यञ्जनानां च तत्क्षणपूर्वम् आगच्छतः।

- **अनुस्वारः** (ं) – अं (यथा— संस्कृतम्)
- **विसर्गः** (ः) – अः (यथा— रामः)

## ३. व्यञ्जनानि (हल्-वर्णाः)

**व्यञ्जनानि 'हल्'-वर्णाः** इति अपि उच्यन्ते। मूलसंस्कृतवर्णमालायाम् आहत्य ३३ व्यञ्जनानि सन्ति, यानि प्रमुखतया त्रिधा विभक्तानि सन्ति।

### (क) स्पर्श-व्यञ्जनानि (२५-वर्णाः)

**एते वर्णाः** 'वर्गीयव्यञ्जनानि' इति अपि उच्यन्ते, यतः ते ५-५ अक्षराणां समूहे पञ्चवर्गेषु विभक्ताः सन्ति—

- **क-वर्गः** (कण्ठ्यः) – क्, ख्, ग्, घ्, ङ् — उच्चारण-सुविधानामित्तम् (स्वरसहितम्) क, ख, ग, घ, ङ

© NCERT not to be republished

- **च-वर्गः** (तालव्यः) – च्, छ्, ज्, झ्, ञ् च, छ, ज, झ, ञ
- **ट-वर्गः** (मूर्धन्यः) – ट्, ठ्, ड्, ढ्, ण् ट, ठ, ड, ढ, ण
- **त-वर्गः** (दन्त्यः) – त्, थ्, द्, ध्, न् त, थ, द, ध, न
- **प-वर्गः** (ओष्ठ्यः) – प्, फ्, ब्, भ्, म् प, फ, ब, भ, म

**(ख) अन्तस्थ-व्यञ्जनानि (४-वर्णाः)**

- य्, र्, ल्, व् य, र, ल, व

**(ग) ऊष्म-व्यञ्जनानि (४-वर्णाः)**

- श्, ष्, स्, ह् श, ष, स, ह

© NCERT not to be republished



# शरीरस्य अङ्गानि

| संस्कृत | English | हिन्दी | उच्चारणम् |
|---|---|---|---|
| शिरः | Head | सिर | Shi-rah |
| केशः | Hair | बाल | Kay-shah |
| नेत्रम् / नयनम् | Eye | आँख | Net-ram / Nay-nam |
| कर्णः | Ear | कान | Kar-nah |
| नासिका | Nose | नाक | Naa-si-kaa |
| मुखम् | Mouth | मुँह | Muk-ham |
| जिह्वा | Tongue | जीभ | Jih-va |
| हस्तः / करः | Hand | हाथ | Has-tah / Ka-rah |
| कूर्परः | Elbow | कोनी | Koo-rpara-h |
| पादः | Leg | पैर | Paa-dah |
| अङ्गुली | Finger | उंगली | Ang-gu-lee |
| भ्रूः | Eyebrow | भौंह | Broo-h |
| स्तनः | Breast | थन | Sta-na-h |
| अङ्गुष्ठः | Thumb | अंगूठा | Angu-Shtha-h |
| हृदयम् | Heart | सीना | Hri-da-yam |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| मणिबन्धः | Wrist | कलाई | Mani-ban-dhah |
| नाभिः | Navel | नाभि | Naa-bhi-h |
| चिबुकम् | Chin | ठुड्डी | Chi-bu-kam |
| कटिः | Waist | कमर | Ka-ti-h |
| पदतलम् | Sole | तलवा | Pada-tala-m |
| ऊरुः | Thigh | जंघा | Uu-ru-h |
| स्कन्धः | Shoulder | कंधा | Skan-dha-h |
| दन्ताः | Teeth | दाँत | Dan-tha-h |
| ललाटम् | Forehead | माथा | La-la-tam |
| कपोलः | Cheek | गाल | Ka-po-lah |
| ग्रीवा | Neck | गर्दन | Gree-va |
| पृष्ठम् | Back | पीठ | Pri-Shtha-m |
| जानु | Knee | घुटना | Jaa-nu |
| वक्षः/उरः | Chest | छाती | Vaksha-h/U-rah |
| ओष्ठः | Lips | ओंठ | O-Shtha-h |
| उदरम् | Stomach | पेट | U-da-ram |
| गुल्फः | Ankle | टखना | Gul-Pha-h |
| पार्ष्णिः | Heel | एड़ी | Paa-r-Shni-h |
| नखः | Nail | नाखून | Na-Kha-h |

© NCERT not to be republished

## वाक्यप्रयोगः

### एतानि वाक्यानि पठन्तु

- **एतत् मम मुखम् अस्ति।**
  (यह मेरा मुँह है।)
- **अहं नेत्राभ्यां पश्यामि।**
  (मैं दो आँखों से देखता हूँ।)
- **सः हस्तेन लिखति।**
  (वह हाथ से लिखता है।)
- **वयम् कर्णाभ्यां शृणुमः।**
  (हम सब दो कानों से सुनते हैं।)

## पाठः (मम शरीरम्)

एषः बालकः अस्ति। (यह एक लड़का है।)

तस्य **शरीरम्** सुन्दरम् अस्ति। (उसका शरीर सुंदर है।)

बालकस्य **शिरः** उपरि अस्ति। (बालक का सिर ऊपर है।)

तस्य **नेत्रे** शोभने स्तः। (उसकी दो आँखें सुंदर हैं।)

सः **कर्णाभ्यां** शृणोति। (वह कान से सुनता है।)

सः **नासिकया** जिघ्रति। (वह नाक से सूंघता है।)

तस्य **मुखम्** रक्तम् अस्ति। (उसका मुँह लाल है।)

बालकः **हस्तेन** कार्यं करोति। (बालक हाथ से काम करता है।)

तस्य **अङ्गुल्यः** सन्ति। (उसकी उंगलियाँ हैं।)


सः **पादाभ्यां** चलति। (वह पैरों से चलता है।)

तस्य **पादौ** स्वस्थौ स्तः। (उसके दोनों पैर स्वस्थ हैं।)

बालकः सदा स्वस्थः भवति। (बालक हमेशा स्वस्थ रहता है।)

© NCERT not to be republished

शरीराङ्गानां नामानि




© NCERT not to be republished



# फलानां नामानि

| संस्कृत | English | हिन्दी | उच्चारणम् |
|---|---|---|---|
| आम्रम् | Mango | आम | Aam-ram |
| सेबफलम् | Apple | सेब | Say-ba-Phal-am |
| कदलीफलम् | Banana | केला | Kad-al-ee-Pha l-am |
| द्राक्षाफलम् | Grapes | अंगूर | Draak-shaa-Phal-am |
| दाडिमम् | Pomegranate | अनार | Daa-di-mam |
| नारिकेलम् | Coconut | नारियल | Naa-ri-kay-lam |
| नारङ्गम् | Orange | संतरा | Naa-rang-gam |
| कालिन्दम् | Watermelon | तरबूज | Kaa-lin-dam |
| मधुकर्कटी | Papaya | पपीता | Madhu-kar-ka-tee |
| बीजपूरम्/अमृतफलम् | Guava | अमरूद | Amrit-phal-am |
| जम्बूफलम् | Indian Blckberry | जामुन | Jambu-phal-am |

© NCERT not to be republished

## वाक्यप्रयोगः

### एतानि वाक्यानि पठन्तु

- मम प्रियं फलम् आम्रम् अस्ति।
  (मेरा पसंदीदा फल आम है।)
- बालकः कदलीफलं खादति।
  (बालक केला खाता है।)
- एतत् दाडिमम् अस्ति।
  (यह अनार है।)
- द्राक्षाफलम् मधुरं भवति।
  (अंगूर मीठा होता है।)

### पाठः — वर्णानां संसारः

| English | हिन्दी | संस्कृत | उच्चारणम् |
|---|---|---|---|
| Lotus | कमल | कमलम् / पद्मम् | Kam-alam / Pad-mam |
| Rose | गुलाब | पाटलम् | Paa-tal-am |
| Marigold | गेंदा | गन्धपुष्पम् / स्थूलपुष्पम् | Gandha-push-pam |
| Jasmine | चमेली | मालती / नवमालिका | Maa-la-tee |
| Sunflower | सूरजमुखी | सूर्यकान्तिः / सूर्यपुष्पम् | Soor-ya-kaan-tih |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| Hibiscus | गुड़हल | जपापुष्पम् | Ja-paa-push-pam |
| Magnolia | चम्पा | चम्पकम् | Cham-pa-kam |
| Lily | कुमुद | कुमुदम् | Ku-mu-dam |
| मधुकर्कटी | Papaya | पपीता | Madhu-kar-ka-tee |

## वाक्यप्रयोगः

### एतानि वाक्यानि पठन्तु

- **इदं रक्तं पाटलम् अस्ति।**

  (यह लाल गुलाब है।)
- **कमलम् अस्माकं राष्ट्रियपुष्पम् अस्ति।**

  (कमल हमारा राष्ट्रीय फूल है।)
- **उद्याने पुष्पाणि विकसन्ति।**

  (उद्यान में फूल खिलते हैं।)
- **मालाकारः गन्धपुष्पेण मालां रचयति।**

  (माली गेंदे के फूल से माला बनाता है।)

© NCERT not to be republished



# संस्कृतमासानां नामानि

**अस्माकं भारतीयसंस्कृतौ कालगणनायाः महत्त्वं वर्तते। चान्द्रमासस्य आधारेण वर्षे द्वादश (१२) मासाः भवन्ति। एतेषां मासानां नामानि नक्षत्रैः सह सम्बद्धानि सन्ति।**

(हमारी भारतीय संस्कृति में काल-गणना का बहुत महत्त्व है। चन्द्रमा की गति के आधार पर वर्ष में बारह महीने होते हैं। इन महीनों के नाम नक्षत्रों के साथ जुड़े हुए हैं।)

**द्वादश मासानां नामानि (बारह महीनों के नाम)**

१. **चैत्रः** (मार्च-अप्रैल) – एषः वर्षस्य प्रथमः मासः अस्ति। अस्मिन् मासे नववर्षस्य आरम्भः भवति।

२. **वैशाखः** (अप्रैल-मई) – अस्मिन् मासे अतीव सुखदं वातावरणं भवति, कृषकाः च पक्वेशस्यं कृन्तन्ति।

३. **ज्येष्ठः** (मई-जून) – एषः ग्रीष्मकालस्य मुख्यः मासः अस्ति। अस्मिन् मासे सूर्यस्य आतपः प्रचण्डः भवति।

४. **आषाढः** (जून-जुलाई) – अस्मिन् मासे आकाशे मेघाः आगच्छन्ति, वर्षाकालस्य च आरम्भः भवतः।

५. **श्रावणः** (जुलाई-अगस्त) – एषः मासः शिवस्य प्रियः अस्ति। परितः सर्वत्र हरितिमा दृश्यते।

६. **भाद्रपदः** (अगस्त-सितंबर) – अस्मिन् मासे श्रीकृष्णजन्माष्टमी, गणेशोत्सवः च भवति।

७. **आश्विनः** (सितंबर-अक्टूबर) – एषः शरदृतोः मासः अस्ति। अस्मिन् मासे दुर्गापूजा (नवरात्र) विजयदशमी च आयोज्येते।

८. **कार्तिकः** (अक्टूबर-नवंबर) – अस्मिन् पवित्रमासे दीपावली-उत्सवः भवति। प्रकाशस्य पर्व इदम्।

९. **मार्गशीर्षः** (नवंबर-दिसंबर) – एषः मासः 'आग्रहायण' इति नाम्ना अपि ज्ञायते। अस्मिन् समये मन्दं मन्दं शीतं भवति।

© NCERT not to be republished

**१०. पौषः** (दिसंबर-जनवरी) – एषः अत्यधिकशीतस्य मासः अस्ति। सूर्यस्य प्रकाशः अपि मन्दः प्रतीयते।

**११. माघः** (जनवरी-फरवरी) – अस्मिन् मासे प्रयागे पवित्रस्नानस्य महत्त्वं वर्तते। वसन्तपञ्चमी अपि अस्मिन्नेव मासे भवति।

**१२. फाल्गुनः** (फरवरी-मार्च) – एषः वर्षस्य अन्तिमः मासः अस्ति। अस्मिन् मासे आनन्दस्य पर्व 'होलिकोत्सवः' भवति।

## अभ्यासः (बोध प्रश्न)

**प्रश्न १** वर्षस्य प्रथमः मासः कः अस्ति?

**उत्तर** वर्षस्य प्रथमः मासः **चैत्रः** अस्ति।

**प्रश्न २** दीपावली कस्मिन् मासे भवति?

**उत्तर** दीपावली **कार्तिकमासे** भवति।

**प्रश्न ३** होलिका-उत्सवः कस्य मासस्य अन्ते भवति?

**उत्तर** होलिका-उत्सवः **फाल्गुनमासस्य** अन्ते भवति।

**विशेषः** चैत्रमासात् आरभ्य फाल्गुनमासं यावत् एते मासाः भारतीयपञ्चाङ्गस्य आधाराः सन्ति। एतेषां ज्ञानेन वयं स्वसंस्कृतिं ज्ञातुं शक्नुमः।

© NCERT not to be republished

## भारतीय-मासानाम् नामानि स्मराम:

| | |
|---|---|
| चैत्रः | आश्विनः |
| वैशाखः | कार्तिकः |
| ज्येष्ठः | मार्गशीर्षः |
| आषाढः | पौषः |
| श्रावणः | माघः |
| भाद्रपदः | फाल्गुनः |



# वर्णाः

संस्कृत में रंग को 'वर्णः' कहा जाता है। अधः संस्कृते प्रमुख-वर्णानां नामानि, तेषाम् उच्चारणस्य अर्थस्य च सूची प्रदत्ता अस्ति, यां पठित्वा भवन्तः वर्णविषये जानन्तु–

संस्कृते वर्णानां नामानि—

| | | | |
|---|---|---|---|
| १. | **श्वेतः/ शुक्लः** | – | सफेद (White) |
| २. | **कृष्णः / श्यामः** | – | काला (Black) |
| ३. | **रक्तवर्णः / लोहितः** | – | लाल (Red) |
| ४. | **पीतः / हरिद्राभः** | – | पीला (Yellow) |
| ५. | **हरितः / पलाशः** | – | हरा (Green) |
| ६. | **नीलः** | – | नीला (Blue) |
| ७. | **पाटलः** | – | गुलाबी (Pink) |
| ८. | **श्यावः / कपिशः** | – | भूरा (Brown) |
| ९. | **कौसुम्भः / नारङ्गवर्णः** | – | नारंगी (Orange) |
| १0. | **धूसरः** | – | ग्रे / मटमैला (Grey) |

**वाक्य-प्रयोगः**

- **श्वेतं कमलम् अस्ति।** (कमल सफेद है।)
- **मेघः कृष्णः अस्ति।** (बादल काला है।)
- **पत्रं हरितं भवति।** (पत्ता हरा होता है।)
- **रक्तं वस्त्रम् धारयति।** (लाल वस्त्र पहनते हैं।)
- **आकाशः नीलः अस्ति।** (आकाश नीला है।)

© NCERT not to be republished

## पाठः — वर्णानां संसारः

**शिक्षकः** – भो छात्राः! अद्य वयम् अस्मान् परितः विद्यमानानां वर्णानां (रङ्गाणाम्) विषये पठिष्यामः। पश्यन्तु, एषः कः वर्णः? (एकं **रक्त**पुष्पं दर्शयति)

**छात्रा** – आचार्य! एषः **रक्तवर्णः** (लाल-चित्र) अस्ति।

**शिक्षकः** – शोभनम्! रक्तवर्णः कस्य कस्य भवति?

**राधा** – गुरुदेव! सेबफलं (सेब) रक्तवर्णं भवति। दाडिमम् (अनार) अपि रक्तवर्णं भवति।

**शिक्षकः** – उत्तमम्। अधुना गगनं (आकाशं) पश्यन्तु। गगनस्य वर्णः कः?

**रमेशः** – गगनस्य वर्णः **नीलवर्णः** (नीला-चित्र) अस्ति। समुद्रजलम् अपि नीलवर्णं दृश्यते।

**शिक्षकः** – सत्यम्। परितः वृक्षान् पश्यन्तु। वृक्षाणां पत्राणि कीदृशानि सन्ति?

**गीता** – वृक्षाणां पत्राणि **हरितवर्णानि** (हरे रंग का चित्र) सन्ति। शुकः (तोता) अपि हरितवर्णः भवति।

**शिक्षकः** – बहु सम्यक्। सूर्यस्य वर्णः कः? सूर्यप्रकाशः कीदृशः भवति?

**मोहनः** – सूर्यः उदितकाले रक्त-पीताभः भवति, परं तस्य प्रकाशः **श्वेतवर्णः** (सफेद -चित्र) भवति। पक्वम् आम्रफलम् (पका हुआ आम) अपि पीतवर्णं भवति।

**शिक्षकः** – अति उत्तमम्। अधुना वदन्तु, काकस्य (कौए का) वर्णः कः? कोकिलस्य च वर्णः कः?

**छात्रा** – काकः **कृष्णवर्णः** (काला-**चित्र**) भवति, कोकिलः अपि कृष्णवर्णः एव भवति। अस्माकं केशाः (बाल) अपि कृष्णाः सन्ति।

© NCERT not to be republished

**शिक्षकः** – साधु साधु! दुग्धस्य (दूध) वर्णः कः ? हंसः वर्णः कीदृशः भवति ?

**राधा:** – दुग्धं **श्वेतवर्णं** (सफेद) भवति। हंसः अपि श्वेतः भवति।

**शिक्षकः** – एवमेव अन्यान् अपि वर्णान् जानीमः। नारङ्गफलस्य (संतरे) वर्णः **नारङ्गवर्णः** (नारंगी), कपोतस्य (कबूतर) वर्णः **धूसरवर्णः** (स्लेटी/धूसर), त था च मृत्तिकायाः (मिट्टी) वर्णः **पाटलवर्णः** (गुलाबी) अथवा **कपिशवर्णः** (भूरा) भवति।

**शिक्षकः** – अहो! एते सर्वे वर्णाः मिलित्वा अस्माकं संसारं सुन्दरं कुर्वन्ति।

**सहायता के लिए कुछ मुख्य रंगों का नाम रंगीन वृत्त बनाकर समझाया जा सकता है।**

© NCERT not to be republished



# संस्कृत-संख्याः १ तः १००

| | | | | |
|---|---|---|---|---|
| १. एकः / एका / एकम् : | ११. एकादश | २१. एकविंशतिः | ३१. एकत्रिंशत् | ४१. एकचत्वारिंशत् |
| २. द्वौ / द्वे / द्वे | १२. द्वादश | २२. द्वाविंशतिः | ३२. द्वात्रिंशत् | ४२. द्विचत्वारिंशत् |
| ३. त्रयः/ तिस्रः/ त्रीणि | १३. त्रयोदश | २३. त्रयोविंशतिः | ३३. त्रयस्त्रिंशत् | ४३. त्रिचत्वारिंशत् |
| ४. चत्वारः/चतस्रः/ चत्वारि | १४. चतुर्दश | २४. चतुर्विंशतिः | ३४. चतुस्त्रिंशत् | ४४. चतुश्चत्वारिंशत् |
| ५. पञ्च | १५. पञ्चदश | २५. पञ्चविंशतिः | ३५. पञ्चत्रिंशत् | ४५. पञ्चचत्वारिंशत् |
| ६. षट् | १६. षोडश | २६. षड्विंशतिः | ३६. षट्त्रिंशत् | ४६. षट्चत्वारिंशत् |
| ७. सप्त | १७. सप्तदश | २७. सप्तविंशतिः | ३७. सप्तत्रिंशत् | ४७. सप्तचत्वारिंशत् |
| ८. अष्ट | १८. अष्टादश | २८. अष्टाविंशतिः | ३८. अष्टात्रिंशत् | ४८.अष्टचत्वारिंशत् |
| ९. नव | १९. नवदश | २९. नवविंशतिः | ३९. नवत्रिंशत् | ४९. नवचत्वारिंशत् |
| १०. दश | २०. विंशतिः | ३०. त्रिंशत् | ४०. चत्वारिंशत् | ५०. पञ्चाशत् |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| ५१. एकपञ्चाशत् | ६१. एकषष्टिः | ७१. एकसप्ततिः | ८१. एकाशीतिः | ९१. एकनवतिः |
| ५२. द्विपञ्चाशत् | ६२. द्विषष्टिः | ७२. द्विसप्ततिः | ८२. द्व्यशीतिः | ९२. द्विनवतिः |
| ५३. त्रिपञ्चाशत् | ६३. त्रिषष्टिः | ७३. त्रिसप्ततिः | ८३. त्र्यशीतिः | ९३. त्रिनवतिः |
| ५४. चतुःपञ्चाशत् | ६४. चतुष्षष्टिः | ७४. चतुस्सप्ततिः | ८४. चतुरशीतिः | ९४. चतुर्नवतिः |
| ५५. पञ्चपञ्चाशत् | ६५. पञ्चषष्टिः | ७५. पञ्चसप्ततिः | ८५.पञ्चाशीतिः | ९५. पञ्चनवतिः |
| ५६. षट्पञ्चाशत् | ६६. षट्षष्टिः | ७६. षट्सप्ततिः | ८६. षडशीतिः | ९६. षण्णवतिः |
| ५७. सप्तपञ्चाशत् | ६७. सप्तषष्टिः | ७७. सप्तसप्ततिः | ८७. सप्ताशीतिः | ९७. सप्तनवतिः |
| ५८. अष्टपञ्चाशत् | ६८. अष्टषष्टिः | ७८. अष्टसप्ततिः | ८८. अष्टाशीतिः | ९८. अष्टनवतिः |
| ५९. नवपञ्चाशत् | ६९. नवषष्टिः | ७९. नवसप्ततिः | ८९. नवाशीतिः | ९९. नवनवतिः |
| ६०. षष्टिः | ७०. सप्ततिः | ८०. अशीतिः | ९०. नवतिः | १००. शतम् |

© NCERT not to be republished

## सङ्ख्यानां वर्गीकरणम्

संस्कृतभाषायां संख्यानां रूपत्रयं भवति

- **एकतः चतुः पर्यन्तम्** — एताः सङ्ख्याः त्रिषु लिङ्गेषु भिन्नाः भवन्ति (यथा-एकः बालकः, एका बालिका, एकं फलम्)।
- **पञ्चतः अष्टादश पर्यन्तम्** — एताः सङ्ख्याः त्रिषु लिङ्गेषु समानाः भवन्ति (यथा-पञ्च बालकाः, पञ्च बालिकाः, पञ्च फलानि)।
- **विंशतितः नवनवतिपर्यन्तम्** — एताः सङ्ख्याः नित्यं स्त्रीलिङ्गे एकवचने च भवन्ति।
- **शतम्** — एषा सङ्ख्या नित्यं नपुंसकलिङ्गे भवति।

**सङ्ख्यानां परिचयः(१-१००)** — एकस्मिन् वर्षे **द्वादश** (१२) मासाः भवन्ति। एकस्मिन् मासे **त्रिंशत्** (३०) अथवा **एकत्रिंशत्** (३१) दिनानि भवन्ति। फरवरी-मासे **अष्टाविंशतिः** (२८) अथवा **नवविंशतिः** (२९) दिनानि भवन्ति। एकस्मिन् सप्ताहे **सप्त** (७) दिनानि भवन्ति। एकस्मिन् दिने **चतुर्विंशतिः** (२४) होराः (घण्टाः) भवन्ति। **पञ्चदश** (१५) दिनानाम्

**एकः** (१) पक्षः भवति- शुक्लपक्षः/ कृष्णपक्षः वा। एकस्मिन् विद्यालये **पञ्चाशत्** (५०) शिक्षिकाः पाठयन्ति। तत्र **द्विपञ्चाशत्** (५२) प्रकोष्ठाः (कमरे) सन्ति। क्रीडाङ्गणे **चतुःषष्टिः** (६४) छात्राः कन्दुकेन क्रीडन्ति। पुस्तकालये **पञ्चसप्ततिः** (७५) आसन्दाः (कुर्सियाँ) सन्ति। विद्यालयस्य परीक्षायां **नवतिः** (९०) प्रतिशतं छात्राः उत्तीर्णाः अभवन्। तेषु **षण्णवतिः** (९६) छात्राः विशिष्टयोग्यतां प्राप्तवन्तः। परीक्षायाः पूर्णाङ्कः **शतम्** (१००) आसीत्।

© NCERT not to be republished



# वस्तु-परिचयः (त्रिषु लिङ्गेषु)

संस्कृतभाषायां त्रीणि लिङ्गानि भवन्ति — **पुल्लिङ्गम् (Masculine), स्त्रीलिङ्गम् (Feminine), नपुंसकलिङ्गम् (Neuter) च**। वस्तूनां लिङ्गभेदः स्वरूपानुसारं व्याकरणनियमानुसारं च भवति।

अत्र त्रिविधलिङ्गानां परिचयस्य १०-१० वस्तूनां सोदाहरणं पाठः च प्रदत्तः अस्ति।

## १. पुंलिङ्गी-शब्दाः

पुंलिङ्गवाचिनः शब्दाः प्रायः अकारान्ताः (विसर्गयुक्ताः) भवन्ति।

- **चषकः**(Glass) – एषः मम चषकः अस्ति।
- **स्यूतः**(Bag) – छात्रः स्यूतं गृह्णाति।
- **दीपः**(Lamp) – गृहे दीपः प्रज्वलति।
- **घटः**(Pot) – घटे जलं पूरितम् अस्ति।
- **कटः**(Mat) – भूमौ कटः अस्ति।
- **दन्तफेनः**(Toothpaste) – प्रातः दन्तफेनस्य आवश्यकता भवति।
- **दर्पणः**(Mirror) – बालकः दर्पणे मुखं पश्यति।
- **आसन्दः**(Chair) – सः आसन्दे उपविशति।
- **उत्करः**(Dust/Garbage) – उत्करः अवकरिकायां अस्ति।
- **चमसः**(Spoon) – वयं चमसेन भोजनं कुर्मः।

© NCERT not to be republished

## २. स्त्रीलिङ्ग-शब्दाः

स्त्रीलिङ्गवाचिनः शब्दाः प्रायः आकारान्ताः अथवा ईकारान्ताः भवन्ति।

- **उत्पीठिका** (Table) – उत्पीठिकायां पुस्तकानि सन्ति।
- **लेखनी** (Pen) – एषा मम नूतना लेखनी।
- **कङ्कतम् / कङ्कती** (Comb) – सा कङ्कतेन केशान् संस्करोति।
- **घटी** (Clock) – घटी समयं दर्शयति।
- **कूर्चिका** (Brush) – कूर्चिकया भित्तौ वर्णलेपनं भवति।
- **कुञ्चिका** (Key) – ताले कुञ्चिका स्थापिता अस्ति।
- **मापिका** (Scale/Ruler) – छात्रः मापिकया रेखां रचयति।
- **मार्जनी** (Eraser/Duster) – मार्जन्या कृष्णफलकस्य मार्जनं भवति।
- **दूरवाणी** (Telephone) – दूरभाषयन्त्रेण/दूरवाण्या वार्तालापः भवति।
- **पेटिका** (Box) – धनं पेटिकायां सुरक्षितं तिष्ठति।

## ३. नपुंसकलिङ्ग-शब्दाः

नपुंसकलिङ्गवाचिनः शब्दाः प्रायः प्रथमा-विभक्तेः अन्ते 'म्'युक्ताः भवन्ति। (किन्तु ते 'अ'कारान्ताः एव भवन्ति।)

- **पुस्तकम्** (Book) – एतत् ज्ञानवर्धकं पुस्तकम् अस्ति।
- **फलकम्** (Board) – शिक्षकः फलके लिखति।
- **व्यजनम्** (Fan) – ग्रीष्मकाले व्यजनं चलति।
- **द्वारम्** (Door) – कृपया द्वारम् उद्घाटयतु।
- **वातायनम्** (Window) – वातायनेन वायुः आगच्छति।
- **गृहम्** (House) – मम गृहम् सुन्दरं वर्तते।

© NCERT not to be republished

- **वस्त्रम्** (Cloth) – बालकः स्वच्छं वस्त्रं धरति।
- **छत्रम्** (Umbrella) – वृष्टिकाले छत्रस्य उपयोगः भवति।
- **उपनेत्रम्** (Spectacles) – पितामहः उपनेत्रं धारयति।
- **कन्दुकम्** (Ball) – बालाः कन्दुकेन क्रीडन्ति।

## अभ्यासः

| पुंल्लिङ्गः (अः) | स्त्रीलिङ्गः (आ / ई) | नपुंसकलिङ्गः (अम्) |
|---|---|---|
| दीपः (Lamp) | उत्पीठिका (Table) | पुस्तकम् (Book) |
| स्यूतः (Bag) | लेखनी (Pen) | व्यजनम् (Fan) |
| आसन्दः (Chair) | घटी (Clock) | वस्त्रम् (Cloth) |

© NCERT not to be republished



# शब्दरूप-परिचयः

## शब्दरूप-परिचयः

संस्कृत भाषा में शब्दों के मूल रूप को '**प्रातिपदिक**' कहते हैं। जब इन शब्दों के साथ विभक्तियाँ जुड़ती हैं, तब वे '**पद**' (शब्दरूप) बनते हैं। वाक्य में केवल 'पदों' का ही प्रयोग होता है, मूल शब्दों का नहीं। इस विषय में कहा गया है– '**अपदं न प्रयुञ्जीत**'।

### १. शब्दरूप के तीन मुख्य आधार

संस्कृत में किसी भी शब्द का रूप जानने के लिए तीन बातें पता होनी चाहिए—

१. **लिङ्ग (Gender)** – संस्कृत में तीन लिंग होते हैं — पुंलिङ्ग (Masculine), स्त्रीलिंग (Feminine), और नपुंसकलिंग (Neuter)।

२. **अन्त (Ending Sound)** – शब्द के अंत में स्वर/व्यञ्जन। जैसेः 'राम' के अंत में 'अ' है (अकारान्त), 'मुनि' के अंत में 'इ' है (इकारान्त)।

३. **वचन (Number)** – संस्कृत में तीन वचन होते हैं— एकवचन (One), द्विवचन (Two), और बहुवचन (More than two)।

### २. विभक्तियाँ और उनके अर्थ

संस्कृत में ७ विभक्तियाँ और १ सम्बोधन होता है। ये वाक्यों में कारकों (Positions) को दर्शाती हैं—

| विभक्ति | कारक | चिह्न | अर्थ / उपयोग उदाहरण |
|---|---|---|---|
| प्रथमा | कर्ता (Subject) | ने / | कार्य करने वाला बालक ने |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| द्वितीया | कर्म (Object) | को | जिस पर कार्य का फल पड़े, बालक को |
| तृतीया | करण (Instrument) | से / द्वारा | जिसके द्वारा कार्य हो, बालक के द्वारा |
| चतुर्थी | सम्प्रदान (Dative) | के लिए | जिसके लिए कार्य हो, बालक के लिए |
| पञ्चमी | अपादान (Ablative) | से (अलग होना) | किसी स्थान या वस्तु से अलग होना, बालक से |
| षष्ठी | सम्बन्ध (Genitive) | का / की / के | संबंध बताने के लिए, बालक का/की/के |
| सप्तमी | अधिकरण (Locative) | में / पर | कार्य का आधार या स्थान, बालक में |
| सम्बोधन | सम्बोधन (Vocative) | हे ! / अरे ! | किसी को बुलाने के लिए, हे बालक! |

### ३. यथा— अकारान्त पुंलिङ्ग — 'बालक' शब्दरूप

छात्रों के लिए सबसे पहले 'अकारान्त पुंलिङ्ग' (अ स्वर से अंत होने वाले पुरुषवाचक शब्द) सीखना सबसे सरल होता है।

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः (एक बालक ने) | बालकौ (दो बालकों ने) | बालकाः (सब बालकों ने) |
| द्वितीया | बालकम् (बालक को) | बालकौ (दो बालकों को) | बालकान् (सब बालकों को) |
| तृतीया | बालकेन (बालक से/ द्वारा) | बालकाभ्याम् | बालकैः |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| चतुर्थी | बालकाय (बालक के लिए) | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् (बालक से- अलग होने के अर्थ में) | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य (बालक का/की/के) | बालकयोः | बालकानाम् |
| सप्तमी | बालके (बालक में/ पर) | बालकयोः | बालकेषु |
| सम्बोधन | हे बालक ! | हे बालकौ ! | हे बालकाः ! |

**नोट** – राम, देव, छात्र, नृप (राजा) और वृक्ष आदि सभी अकारान्त पुल्लिंग शब्दों के रूप भी इसी प्रकार से होते हैं।

### ४. वाक्यों में प्रयोग

आइए, देखें कि इन शब्दरूपों का वाक्यों में उपयोग किस प्रकार होता है—

- **प्रथमा (कर्ता)** – बालकः पठति। (बालक पढ़ता है।)
- **द्वितीया (कर्म)** – अहं बालकं पश्यामि। (मैं बालक को देखता हूँ।)
- **तृतीया (करण)** – जनकः बालकेन सह गच्छति। (पिता बालक के साथ जाते हैं।)
- **चतुर्थी (सम्प्रदान)** – माता बालकाय दुग्धं यच्छति। (माता बालक के लिए दूध देती है।)
- **पञ्चमी (अपादान)** – ज्ञानं बालकात् न दूरे अस्ति। (ज्ञान बालक से दूर नहीं है।)
- **षष्ठी (सम्बन्ध)** – एतत् बालकस्य पुस्तकम् अस्ति। (यह बालक की पुस्तक है।)
- **सप्तमी (अधिकरण):** बालके उत्तम-गुणाः सन्ति। (बालक में अच्छे गुण हैं।)

© NCERT not to be republished



# धातुरूपपरिचयः (क्रियारूपाणि)

संस्कृते क्रियापदस्य मूलरूपं 'धातुः' (मूलशब्दः) उच्यते। यथा– 'पठति' इति क्रियापदस्य मूलरूपं 'पठ्' (पढना)। यदा एतैः धातुभिः सह काल-पुरुषयोः प्रत्ययस्य योजनं भवति तदा ते एव 'धातुरूपेण' ज्ञायन्ते।

## १. धातुरूपस्य त्रयः स्तम्भाः

संस्कृते कस्यापि क्रियापदस्य रूपं ज्ञातुं त्रयः अंशाः अत्यावश्यकाः सन्ति—

१. **लकारः** – (कालाः/भावाः) संस्कृते दश(१०)-लकाराः भवन्ति, किन्तु व्यवहारे ५ लकाराणां प्रयोगाः भवन्ति। (लट्, लृट्, लङ्, लोट्, विधि-लिङ् च) आरम्भिकछात्राणां कृते प्रथमं 'लट्-लकारस्य लृट्-लकारस्य च' (वर्तमानकालस्य, भविष्यत्-कालस्य च) शिक्षणम् अत्यावश्यकम्।

२. **पुरुषः** – संस्कृते क्रियापदस्य अपि त्रयः पुरुषाः भवन्ति।

**यथा—**

- ✯ प्रथमः पुरुषः (Third Person) – नमति/नमतः/ नमन्ति।
- ✯ मध्यमः पुरुषः (Second Person) – नमसि/नमथः/ नमथ।
- ✯ उत्तमः पुरुषः (First Person) – नमामि/नमावः/नमामः।

३. **वचनम्** – शब्दरूपमिव अत्रापि त्रीणि वचनानि भवन्ति — एकवचनम्, द्विवचनम्, बहुवचनम् च।

## २. कस्यापि धातोः रूप-निर्माणार्थं धातुपश्चात् अधोलिखितानुसारं प्रत्ययाः योजिताः भवन्ति।

© NCERT not to be republished

**लट्-लकारस्य (वर्तमान-कालस्य) सूत्राणि/प्रत्ययाः वा।**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | ति(तिप्) | तः(तस्) | अन्ति(झि) |
| मध्यमः पुरुषः | सि (सिप्) | थः(थस्) | थ(थ) |
| उत्तमः पुरुषः | आमि(मिप्) | आवः(वस्) | आमः(मस्) |

**लृट्-लकारस्य (भविष्यत्-कालस्य) सूत्राणि/प्रत्ययाः वा।**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | (इ+ष्य/स्य)ति | (इ+ष्य/स्य)तः | (इ+ष्य/स्य)अन्ति |
| मध्यमः पुरुषः | (इ+ष्य /स्य)सि | (इ+ष्य/स्य)थः | (इ+ष्य/स्य)थ |
| उत्तमः पुरुषः | (इ+ष्य /स्य)आमि | (इ+ष्य /स्य)आवः | (इ+ष्य/स्य)आमः |

**३. उदाहरणम् – 'पठ्' धातु (पढ़ना) - लट्-लकारः (वर्तमान-कालः)**

**आगच्छन्तु उपरि दत्तान् प्रत्ययान् 'पठ्' इति धातुना सह योजयित्वा रूपं रचयामः —**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति (वह पढ़ता/ पढ़ती है) | पठतः (वे दोनों पढ़ते/ पढ़ती हैं) | पठन्ति (वे सब पढ़ते/ पढ़ती हैं) |
| मध्यमपुरुषः | पठसि (तुम पढ़ते/ पढ़ती हो) | पठथः (तुम दोनों पढ़ते/ पढ़ती हो) | पठथ (तुम सब पढ़ते/ पढ़ती हो) |
| उत्तमपुरुषः | पठामि (मैं पढ़ता/ पढ़ती हूँ) | पठावः (हम दोनों पढ़ते/ पढ़ती हैं) | पठामः (हम सब पढ़ते/ पढ़ती हैं) |

© NCERT not to be republished

**नोटः** – चल् (चलना), लिख् (लिखना), खाद् (खाना), हस् (हसना) इत्यादि-धातूनां रूपाणि अपि समानानि एव भवन्ति।

**उदाहरणम्** – 'पठ्' धातु (पढना) – लृट्-लकारः (भविष्यत्-कालः)

आगच्छन्तु उपरि दत्तान् प्रत्ययान् 'पठ्' इति धातुना सह योजयित्वा रूपं रचयामः —

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति (वह पढ़ेगा/ पढ़ेगी) | पठिष्यतः (वे दोनों पढ़ेंगे/ पढ़ेंगी) | पठिष्यन्ति (वे सब पढ़ेंगे/ पढ़ेंगी) |
| मध्यमपुरुषः | पठिष्यसि (तुम पढ़ोगे/ पढ़ोगी) | पठिष्यथः (तुम दोनों पढ़ोगे/ पढ़ोगी) | पठिष्यथ (तुम सब पढ़ोगे/ पढ़ेंगी) |
| उत्तमपुरुषः | पठिष्यामि (मैं पढ़ूंगा) | पठिष्यावः (हम दोनों पढ़ेंगे) | पठिष्यामः (हम सब पढ़ेंगे) |

**नोटः** – चल् (चलना), भू-भव् (होना), खाद् (खाना), हस् (हसना) इत्येतेषां रूपाणि अपि समानानि एव भवन्ति।

## ४. वाक्येषु प्रयोगः (वाक्यों में प्रयोग)

**संस्कृते एकः नियमः अस्ति-कर्तुः क्रियायाः च वचनपुरुषौ समानौ भवतः।**

**प्रथम-पुरुषः**

बालकः पठति। (बालक पढ़ता है।)

बालकौ पठतः। (दो बालक पढ़ते हैं।)

बालकाः पठन्ति। (सब बालक पढ़ते हैं।)

**मध्यम-पुरुषः**

त्वं पठसि। (तुम पढ़ते हो।)

© NCERT not to be republished

युवां पठथः। (तुम दोनों पढ़ते हो।)

यूयं पठथ। (तुम सब पढ़ते हो।)

**उत्तम-पुरुषः**

अहं पठामि। (मैं पढ़ता हूँ।)

आवां पठावः। (हम दोनों पढ़ते हैं।)

वयं पठामः। (हम सब पढ़ते हैं।)

**एवमेव लृट्-लकारस्य वाक्यानि अपि रचयन्तु।**

© NCERT not to be republished



# अव्ययानि

संस्कृतभाषायां कानिचन तादृशानि पदानि भवन्ति, येषां रूपं कस्यामपि परिस्थितौ न परिवर्तते। एतानि पदानि अव्ययानि (Indeclinables) इति कथ्यन्ते। स्थान-दिशादि-बोधक-अव्ययानां प्रयोगेण वाक्यरचना अतीव सरला भवति।

अव्ययानां व्याख्या अस्मिन् श्लोके प्रदत्ता अस्ति।

**सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

**अर्थात्** – त्रिषु अपि लिङ्गेषु समानरूपं, सर्वासु विभक्तिषु समानरूपं, सर्वेषु वचनेषु अपि समानरूपं स्यात्, यस्य पदस्य सर्वथा परिवर्तनं न भवेत्, तदेव अव्ययपदं भवति। अत्र एतेषाम् अव्ययानाम् उदाहरणसहितानि कतिचन वाक्यानि प्रदत्तानि सन्ति।

## १. स्थानवाचक-अव्ययानि

**एतानि अव्ययानि स्थानस्य अथवा स्थितेः बोधं कारयन्ति।**

**अत्र (Here)**

भवान् अत्र उपविशतु। (You sit here.)

**तत्र (There)**

तत्र एकः विशालः वृक्षः अस्ति। (There is a huge tree there.)

**सर्वत्र (Everywhere)**

ईशः सर्वत्र विद्यते। (God is everywhere.)

**अन्यत्र (Elsewhere)**

सः अत्र नास्ति, अन्यत्र गतः। (He is not here, he went elsewhere.)

© NCERT not to be republished

**एकत्र (In one place / Together)**

सर्वे छात्राः एकत्र मिलन्ति। (All students gather together.)

**कुत्र (Where)**

भवतः गृहं कुत्र अस्ति ? (Where is your house ?)

## २. दिशा-स्थितिवाचक-अव्ययानि

**एतानि अव्ययानि उपरि-अधः अथवा वाम-दक्षिणादि दिशानां बोधं कारयन्ति।**

**उपरि (Above / On top)**

वृक्षस्य उपरि खगाः कूजन्ति। (Birds are chirping on top of the tree.)

**अधः (Below / Under)**

आसन्दस्य अधः बिडालः सुप्तः अस्ति। (The cat is sleeping under the chair.)

**पुरतः (In front of)**

मम गृहस्य पुरतः उद्यानम् अस्ति। (There is a garden in front of my house.)

**पृष्ठतः (Behind)**

गृहस्य पृष्ठतः कूपः वर्तते। (There is a well behind the house.)

**वामतः (To the left)**

देवालयस्य वामतः नदी वहति। (The river flows to the left of the temple.)

**दक्षिणतः (To the right)**

राजमार्गस्य दक्षिणतः चलतु। (Walk on the right side of the highway.)

© NCERT not to be republished

## लघु-कथा (अव्ययानां प्रयोगः)

एकः काकः अस्ति। सः जलार्थं इतस्ततः (here and there) भ्रमति। कुत्र अपि जलं नास्ति। सः एकस्य गृहस्य पृष्ठतः गच्छति। तत्र घटः अस्ति। घटस्य अधः लघुप्रस्तराः (pebbles) सन्ति। घटस्य उपरि काकः उपविशति। घटे जलं अल्पं आसीत्। सः प्रस्तरान् एकत्र करोति, घटे च क्षिपति। जलं उपरि आगच्छति। काकः जलं पीत्वा गच्छति।

| अव्ययपदम् | अर्थः | विपरीतपदम् |
|---|---|---|
| अत्र | यहाँ (Here) | तत्र (There) |
| उपरि | ऊपर (Above) | अधः (Below) |
| पुरतः | सामने (In front) | पृष्ठतः (Behind) |
| वामतः | बाईं ओर (Left) | दक्षिणतः (Right) |

© NCERT not to be republished



# संस्कृत-वाक्यरचना

संस्कृते वाक्यरचना अतीव सरला अस्ति, यतः संस्कृतवाक्येषु शब्दानां क्रमपरिवर्तने अर्थः प्रायः न परिवर्तितः भवति। प्रारम्भे वाक्यनिर्माणाय यूयं केवलं त्रीन् अंशान् अवगच्छत

[१, २, ३]

## १. मुख्य-संरचना

**सामान्यतः** संस्कृत-वाक्यानां क्रमः एतादृशः भवति–

- कर्ता (Subject) – यः कार्यं करोति।
- कर्म (Object) – यस्य उपरि कार्यस्य फलं/परिणामः वा भवति।
- क्रिया (Verb) – यत् कार्यं क्रियते।

उदाहरणम्

- हिन्दी – राम फल खाता है।
- संस्कृतम् – रामः फलं खादति।

(रामः – कर्ता, फलम्-कर्म, खादति-क्रिया)

## २. नियमः ⟶ कर्तृ-क्रिययोः समन्वयः

संस्कृतस्य वाक्यरचनायाः महत्त्वपूर्णः नियमः अस्ति-यस्मिन् पुरुषे वचने च कर्ता भवति, क्रिया अपि तस्मिन् पुरुषे वचने एव भवति।

संस्कृते त्रयः पुरुषाः त्रीणि वचनानि च भवन्ति—

**प्रथम-पुरुषः (Third Person - वह/वे)**

- सः (वह) – खादति (खाता है)
- तौ (वे दोनों) – खादतः (खाते हैं)
- ते (वे सब) – खादन्ति (खाते हैं)

© NCERT not to be republished

**मध्यम-पुरुषः (Second Person - तुम)**

- त्वम् (तुम) – खादसि (खाते हो)
- युवाम् (तुम दोनों) – खादथः (खाते हो)
- यूयम् (तुम सब) – खादथ (खाते हो)

**उत्तम-पुरुषः (First Person - मैं/हम)**

- अहम् (मैं) – खादामि (खाता हूँ)
- आवाम् (हम दोनों) – खादावः (खाते हैं)
- वयम् (हम सब) – खादामः (खाते हैं)

## ३. कारकाणि विभक्तयः च (केवलम् आरम्भस्तरे)

वाक्येषु शब्दानां सार्थकप्रयोगाय शब्देषु विभक्तयः प्रयुक्ताः भवन्ति—

- प्रथमा (कर्ता) – ने/अकेला (जैसे— बालकः – बालक)
- द्वितीया (कर्म) – को (जैसे— विद्यालयम् – विद्यालय को)
- तृतीया (करण) – से/द्वारा (जैसे— हस्तेन – हाथ से)

**सार्थकवाक्य-रचनायाः क्रमः**

- संस्कृतम्— बालकः हस्तेन फलं खादति।
- हिन्दी— बालक हाथ से फल खाता है।


**सर्वाधिकं महत्त्वपूर्ण-वैशिष्ट्यम्**

संस्कृतस्य वाक्येषु पदानां (words) क्रमः सुनिश्चितः न भवति। यदि भवन्तः 'खादति फलं रामः' अथवा 'फलं रामः खादति' इत्यपि वदन्ति/लिखन्ति वा, तर्हि अपि वाक्यं सर्वथा शुद्धम् एव स्थास्यति अर्थः न परिवर्त्यते।

© NCERT not to be republished

## क्रियाकलापः

**अधोलिखिततेन चित्राधारेण सरलानि पञ्च वाक्यानि संस्कृतभाषया लिखत।**



**यथा**— स्यूते फलानि सन्ति।

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................



**यथा**— रमेशः कार्यालयं गच्छति।

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

..............................................................................

© NCERT not to be republished



# उच्चारण-स्थानानि

संस्कृत-व्याकरण-परम्परा-अनुसारं मुखस्य यस्मात् भागात् यस्य वर्णस्य उच्चारणं क्रियते सः एव भागः तस्य वर्णस्य उच्चारण-स्थानं(Places of Articulation) कथ्यते। संस्कृते एतेषां स्मरणार्थम् अतीव वैज्ञानिकं संक्षिप्तं च सूत्रं(Formulas) रचितम् अस्ति। एतेषाम् उच्चारणस्थानानां सारणी अधः दत्ता अस्ति।

## संस्कृतवर्णानाम् उच्चारण-स्थान-सारणी


| क्र. सं. | संस्कृत-सूत्रम् | उच्चारण-स्थानम् | सम्मिलित-स्वरः | सम्मिलित-व्यञ्जनम् | अनुस्वारः/ विसर्गः/ अन्यत् च |
|---|---|---|---|---|---|
| १. | अकुहविसर्जनीयानां कण्ठः | कण्ठः | अ, आ | क, ख, ग, घ, ङ, ह | विसर्ग (:) |
| २. | इचुयशानां तालु | तालु | इ, ई | च, छ, ज, झ, ञ, य, श | — |
| ३. | ऋटुरषाणां मूर्धा | मूर्धा | ऋ, ॠ | ट, ठ, ड, ढ, ण, र, ष | — |
| ४. | लृतुलसानां दन्ताः | दन्ताः | लृ | त, थ, द, ध, न, ल, स | — |
| ५. | उपूपध्मानीयानाम् ओष्ठौ | ओष्ठौ | उ, ऊ | प, फ, ब, भ, म | उपध्मानीय (ᳵप ᳵफ) |
| ६. | ञमङणनानां नासिका च | नासिका | — | ङ, ञ, ण, न, म (पञ्चमाक्षरम्) | — |
| ७. | एदैतोः कण्ठतालु | कण्ठ-तालु | ए, ऐ | — | — |
| ८. | ओदौतोः कण्ठोष्ठम् | कण्ठ-ओष्ठम् | ओ, औ | — | — |

© NCERT not to be republished

| | | | | | |
|---|---|---|---|---|---|
| ९. | वकारस्य दन्तोष्ठम् | दन्त-ओष्ठम् | — | व | — |
| १०. | जिह्वामूलीयस्य जिह्वामूलम् | | क ख | (क≍ख) | |
| ११. | नासिकाऽनुस्वारस्य | नासिका | — | — | अनुस्वार ( ं ) |


## संस्कृत वर्णानाम् उच्चारणस्थानानि

कण्ठ्य वर्णाः
अकुहविसर्जनीयानां




अकुहविसर्जनीयानां
कण्ठः
अ आ
क, ख, ग, घ, ङ
ह ः

तालव्य वर्णाः
इचुयशानां तालु




इचुयशानां तालु
इ ई
च, छ, ज, झ, ञ
य श

मूर्धन्य वर्णाः
ऋटुरषाणां मूर्धा




ऋटुरषाणां मूर्धा
ऋ, ॠ
ट, ठ, ड, ढ, ण
र ष

दन्त्य वर्णाः
लृतुलसानां दन्ताः



लृतुलसानां दन्ताः
लृ
त, थ, द, ध, न
ल स

ओष्ठ्य वर्णाः
उपूपध्मनीयानामोष्ठौ



उपूपध्मानीयानामोष्ठौ
उ ऊ
प, फ, ब, भ, म

© NCERT not to be republished

# टिप्पणी

© NCERT not to be republished

## टिप्पणी

© NCERT
not to be republished